## अष्टमः पाठः

# दशपुरीया अष्टमूर्तिः

**मध्यप्रदेशस्य मालवाञ्चले स्थितस्य मन्दसौरनगरस्य पुरातात्त्विकं महत्त्वं तु विदितमेवास्ति। अत्र स्थितस्य भगवतः शिवस्य अष्टमुखाङ्किता लिङ्गप्रतिमा अद्वितीया अनुपमा चास्ति। एषः पाठ डॉ. रामचन्द्रतिवारि-महोदयेन लिखितस्य ''अद्वितीय अष्टमूर्ति'' इति पुस्तकस्यांशः अस्ति। पुरातत्त्वे धर्मदर्शने चास्याभिनिवेशत्वात् अनेनैतत् पुस्तकं लिखितम्।**



मध्यप्रदेशस्य पश्चिमे भागे मालवाञ्चले शिवनानद्यास्तीरे दशपुरं नाम नगरमस्ति। दशपुरम् अधुना मन्दसौरम् इति नाम्ना प्रख्यातमस्ति। एतस्य दशपुरस्य वर्णनम् महाकविकालिदासेनापि स्वकीये ग्रन्थे मेघदूते कृतम्। अत्रैव शिवनानद्यास्तीरे भगवतः शिवस्य विशालमन्दिरमस्ति। अत्र स्थितम् अष्टमुखाङ्कितं शिवलिङ्गम् अष्टमूर्तिः इति कथितम्। इदानीं सैव पशुपतिनाथः इति नाम्ना दशपुरे प्रख्यातः।

शैवदर्शनदृष्ट्या शैवकलादृष्ट्या च दशपुरीया अष्टमूर्तिः शैवमूर्तिषु अद्वितीया अस्ति। अद्यावधि शैवप्रतिमाः केवलं तिस्रः प्रसिद्धाः सन्ति। प्रथमा – प्रथमशताब्द्याः मथुरायाः अर्धनारीश्वरः। द्वितीया अष्टमशताब्द्याः एलीफैण्टायाः त्रिमूर्तिः। तृतीया दशमशताब्द्याः चिदम्बरस्य नटराजः। शेषाणि लिङ्गानि। तासु तादृशी कला, दर्शनं वा नास्ति यथा दशपुरे वर्तमानायां अष्टमूर्तौ। वस्तुतः सा अनुपमा, अतिशायिनी शैव प्रतिमा अस्ति। अष्ट मुखानि प्रायः ''सप्त फिट'' मानात्मके उत्तुङ्गे विशाले नीललोहिते पाषाणलिङ्गे उट्टङ्कितानि सन्ति।



अस्याः मूर्तेः केवलं चतुर्मुखानि एव पूर्णतया लिङ्गमध्ये निर्मितानि सन्ति, ततोऽधः चतुर्मुखानि केवलम् अर्धांशत एव निर्मितानि सन्ति। वैदेशिकानाम् आक्रमणवशात् एषा मूर्तिः रक्षणार्थम् अर्धनिर्मिता एव शिवनागर्भे (ईशवीये चतुर्दशाब्दे) गोपिता, कालेन नदीप्रवाहात् प्रकटिता एषा मूर्तिः 1940 ईशवीये वर्षे भक्तैः दृष्टा, तटे प्रतिष्ठापिता च। अस्याः निर्मितानि मुखानि अतीव सुन्दराणि जीवनतत्त्वस्य व्यञ्जकानि च सन्ति।

दक्षिणमुखशिल्पे विवाहमण्डपस्थस्य वरस्य शृङ्गारमनोरमत्वं दृश्यते। तत्रैव शीर्षे केशकलापे षोडशीचन्द्र कला शोभते च। अत्रैव मुखे शुचिस्मितत्वं मधुरस्मितत्वं च अवलोकनीयम्। अत्र भयङ्कराः सर्पाः न उत्कीर्णाः, केवलं लघु सर्पद्वयं प्रतीकरूपेण उत्कीर्णितं वर्तते।

पूर्वमुखे शान्तरसविशिष्टः शिवसमाधिः व्यज्यते। अस्मिन् केशकिरीटे रुद्राक्षमालयोः रेखाद्वयं निबद्धम्, अस्य। मध्यमणिः तिलकरूपेण उपनिबद्धः। अत्र ग्रीवायां सर्पमाला, मन्दारमाला च शोभेते।

पश्चिममुखे प्रलयङ्करः शिवः रुद्ररूपेण व्यज्यते। अस्यैव मुखस्य सम्पूर्णा शिला केवलं लोहितवर्णा वर्तते। अत्र तादृशी नीलिमा श्वेतधारा वा न दृश्यते यादृशी मुखान्तरेषु। मुखे तृतीयनेत्रं सुस्पष्टम् अवलोक्यते। उग्रक्रोधेन मुखं विकृतम् उत्कीर्णम्। अस्मिन्नेव मुखे ऊँकार उल्लिखितः। ऊँकारादेव उदयः प्रलयश्च उभावपि भवतः इति शिल्पस्य दर्शनम्।

उत्तरमुखे आनन्दतत्त्वस्य व्यञ्जना विद्यते। अस्मिन् भगवान् अट्टहासं कुर्वन् इव प्रतिभाति। अत्र कपोलौ उत्फुल्लौ, अधरोष्ठौ स्फुटौ, नेत्रे निमीलिते, शिथिला: विकीर्णा: मूर्धजा: च सुस्पष्टं दृश्यन्ते।

अर्धनिर्मितेषु अधोऽङ्कितेषु मुखेषु प्रथमे विद्यार्थिभाव: द्वितीये धर्मार्थिभाव:, तृतीये उद्योगार्थिभाव: चतुर्थे च अर्थार्थिभाव: च विद्भि: सम्भाव्यन्ते।

वस्तुत: दशपुरीया अष्टमूर्ति: कलासौन्दर्यदृष्ट्या दार्शनिकदृष्ट्या च सर्वासु शैवप्रतिमासु अद्वितीया उत्कृष्टा दर्शनीया च अस्ति।

## शब्दार्थ:

| | | |
|---|---|---|
| मालवाञ्चले | – | मालवा क्षेत्र में |
| शिवनानद्यास्तीरे | – | शिवना नदी के किनारे |
| अधुना | – | इस समय |
| नाम्ना | – | नाम से |
| स्वकीये | – | स्वयं के |
| अत्रैव | – | यहाँ ही |
| अष्टमुखाङ्कितम् | – | उत्कीर्ण आठ मुख वाली |
| ज्ञायते | – | जानी जाती है। |
| इदानीम् | – | इस समय / अब |
| सैव | – | वह ही |
| प्रख्यात: | – | विख्यात है |
| उत्तुङ्गे | – | ऊँचे |
| नीललोहिते | – | नीले व रक्तवर्ण से युक्त |
| पाषाणलिङ्गे | – | पत्थर के लिङ्ग पर |
| चतुर्मुखानि | – | चार मुँह |
| ततोऽध: | – | उससे नीचे |
| अर्धांशत | – | आधी (पचास प्रतिशत) |
| गोपिता | – | छिपा दी गई |
| विवाहमण्डपस्थस्य | – | विवाह मण्डप में बैठे हुए |
| शीर्षे | – | शीर्ष पर |
| स्मितत्वम् | – | मुस्कुराहट |
| प्रतीकरूपेण | – | प्रतीक रूप से |
| मध्यमणि: | – | बीच की मणि |

| | | |
|---|---|---|
| केशेषु | – | बालों में |
| ग्रीवायाम् | – | गले में |
| मन्दारमाला | – | आक के फूल की माला |
| प्रलयङ्करः | – | प्रलय करने वाले |
| व्यज्यते | – | व्यक्त होता है |
| लोहितवर्णा | – | लाल रंग की / रक्त वर्ण वाली |
| नीलिमाश्वेतधारा | – | नीली अथवा सफेद धारा |
| मुखान्तरेषु | – | दूसरे मुखों में |
| उदयः प्रलयश्च | – | रचना एवं विनाश |
| उभावपि | – | दोनों ही |
| अट्टहासम् | – | जोरों से हँसना |
| कपोलौ उत्फुल्लौ | – | दोनों गाल फूले हुए |
| शिथिलाः | – | ढीले |
| विकीर्णाः | – | फैले हुए |
| मूर्धजाः | – | सिर के बाल |

## अभ्यासः

### ( 1 ) एकपदेन उत्तरं लिखत –

(क) अष्टमूर्तिः कुत्र प्रतिष्ठापिता अस्ति ?

(ख) कति शैवप्रतिमाः प्रसिद्धाः सन्ति ?

(ग) पूर्वमुखे कः रसः विद्यते ?

(घ) कस्य मुखस्य शिला लोहितवर्णा वर्तते ?

(ङ) कस्मिन् मुखे शिवः अट्टहासं कुर्वन् इव प्रतिभाति ?

### ( 2 ) एकवाक्येन उत्तरं लिखत –

(क) अष्टमूर्तिः भक्तैः कस्मिन् ईशवीये दृष्टा ?

(ख) वरस्य शृङ्गारमनोरमत्वं कस्मिन् मुखे उल्लिखितम् ?

(ग) ऐतिहासिकैः अर्धनारीश्वरस्य कः कालः निर्धारितः ?

(घ) अष्टमूर्तिः इदानीं केन नाम्ना प्रख्याता ?

## (3) अधोलिखितप्रश्नानाम् उत्तराणि लिखत –

(क) मूर्तेः पश्चिमे मुखे वैशिष्ट्यं किम् ?

(ख) काः तिस्रः शैवप्रतिमाः प्रसिद्धाः ?

(ग) दशपुरं कुत्र अस्ति ? अधुना केन नाम्ना प्रसिद्धम् ?

(घ) अष्टमूर्तेः उत्तरमुखे कीदृशं वैशिष्ट्यं विद्यते ?

## (4) रिक्तस्थानानि पूरयत –

(क) पूर्वमुखे . . . . . . . . . . . . . . व्यज्यते।

(ख) अष्टमुखाङ्कितं लिङ्गम् . . . . . . . . . . . . . . इति नाम्ना ज्ञायते।

(ग) अद्यावधि शैवप्रतिमाः केवलं . . . . . . . . . . . . . . प्रसिद्धाः।

(घ) लघु . . . . . . . . . . . . . . प्रतीकरूपेण उत्कीर्णितम्।

## (5) युग्ममेलनं कुरुत –

| | (अ) | (आ) |
|---|---|---|
| (क) | उत्तरमुखे | नटराजः |
| (ख) | 1940 ईशवीये | दुर्लभवरस्य |
| (ग) | चिदम्बरस्य | भक्तैः दृष्टा |
| (घ) | दक्षिणमुखशिल्पे | विजयामत्त इव |

## (6) अव्ययैः वाक्यनिर्माणं कुरुत –

### उदाहरणं यथा –

**अधुना – दशपुरम् अधुना मन्दसौरम् इति नाम्ना प्रख्यातम् अस्ति।**

इदानीम् – – – – – – – – – – – – – – – – – – – – – – – –।

यथा – – – – – – – – – – – – – – – – – – – – – – – –।

तथा – – – – – – – – – – – – – – – – – – – – – – – –।

तत्र – – – – – – – – – – – – – – – – – – – – – – – –।

अपि – – – – – – – – – – – – – – – – – – – – – – – –।

अत्र – – – – – – – – – – – – – – – – – – – – – – – –।

**( 7 ) निम्नलिखितशब्दानां सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत –**

**उदाहरणम्**

**विद्यार्थी विद्या + अर्थी = विद्यार्थी दीर्घस्वरसन्धिः**

(क) उभावपि -------- + -------- = -------- ।

(ख) अत्रैव -------- + -------- = -------- ।

(ग) सैव -------- + -------- = -------- ।

(घ) नास्ति -------- + -------- = -------- ।

(ङ) अत्रास्ति -------- + -------- = -------- ।

**( 8 ) उदाहरणानुसारं क्रियापदानां वचनपरिवर्तनं कुरुत –**

| यथा | शोभते | बहुवचने | शोभन्ते |
|---|---|---|---|
| (क) | दृश्यते | बहुवचने | |
| (ख) | वर्तते | बहुवचने | |
| (ग) | विद्यते | द्विवचने | |
| (घ) | लभते | बहुवचने, | |
| (ङ) | सेवते | द्विवचने | |

**( 9 ) निम्नलिखितपदानां समासविग्रहं कृत्वा समासस्य नाम लिखत –**

**उदाहरणं यथा –**

**पाषणलिङ्गे पाषाणस्य लिङ्गे षष्ठी तत्पुरुषसमासः**

(क) अष्टमूर्तिः --------- ----------

(ख) सेनापतिः --------- ----------

(ग) पशुपतिनाथः --------- ----------

(घ) शिवसमाधिः --------- ----------

(ङ) धर्मार्थी --------- ----------

## ( 10 ) निम्नलिखितानां मूलशब्दं विभक्तिं वचनं च लिखत –

| शब्दः | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| **शिवस्य** | **शिव** | **षष्ठी** | **एकवचनम्** |
| सेनापतेः | | | |
| मुखे | | | |
| एतस्य | | | |
| अस्याः | | | |
| नद्याः | | | |
| नाम्ना | | | |

## ( 11 ) निम्नलिखितानां शब्दानां धातुं प्रत्ययं च पृथक् कुरुत –

### उदाहरणं यथा –

| | शब्दः | धातुः | | प्रत्ययः |
|---|---|---|---|---|
| | **ज्ञातम्** | **ज्ञा** | + | **क्त** |
| (क) | जातम् | – – – – – – | | – – – – – – |
| (ख) | कृतम् | – – – – – – | | – – – – – – |
| (ग) | खनित्वा | – – – – – – | | – – – – – – |
| (घ) | ज्ञात्वा | – – – – – – | | – – – – – – |
| (ङ) | दृष्ट्वा | – – – – – – | | – – – – – – |

### योग्यताविस्तारः –

- भवतः नगरे कस्य मन्दिरमस्ति ? पाठानुसारेण तस्य वैशिष्ट्यं वर्णयत।

❖ ❖ ❖